योगवासिष्ठः/प्रकरणम् ४ (स्थितिप्रकरणम्)/सर्गः २२

द्वाविंशः सर्गः २२

श्रीवसिष्ठ उवाच ।

जन्तोः कृतविचारस्य विगलद्वृत्तिचेतसः ।

मननं त्यजतो ज्ञात्वा किंचित्परिणतात्मनः ।। १

दृश्यं संत्यजतो हेयमुपादेयमुपेयुषः ।

द्रष्टारं पश्यतो दृश्यमद्रष्टारमपश्यतः ।। २

जागर्तव्ये परे तत्त्वे जागरूकस्य जीवतः ।

सुप्तस्य घनसंमोहमये संसारवर्त्मनि ।। ३

पर्यन्तात्यन्तवैराग्यात्सरसेष्वरसेष्वपि ।

भोगेष्वाभोगरम्येषु विरक्तस्य निराशिषः ।। ४

व्रजत्यात्माम्भसैकत्वं जीर्णंजाड्ये नभस्यलम् ।

गलत्यपगतासङ्गे हिमापूर इवातपे ।। ५

तरङ्गितासु कल्लोलजललोलान्तरासु च ।

शाम्यन्तीष्वथ तृष्णासु नदीष्विव घनात्यये ।। ६

संसारवासनाजाले खगजाल इवाखुना ।

त्रोटिते हृदयग्रन्थौ श्लथे वैराग्यरंहसा ।। ७

कातकं फलमासाद्य यथा वारि प्रसीदति ।

तथा विज्ञानवशतः स्वभावः संप्रसीदति ।। ८

नीरागं निरुपासङ्गं निर्द्वन्द्वं निरुपाश्रयम् ।

विनिर्याति मनो मोहाद्विहगः पञ्जरादिव ।। ९

शान्ते संदेहदौरात्म्ये गतकौतुकविभ्रमम् ।

परिपूर्णान्तरं चेतः पूर्णेन्दुरिव राजते ।। १०

जनितोत्तमसौन्दर्या दूरादस्तमयोन्नता ।

समतोदेति सर्वत्र शान्ते वात इवार्णवे ।। ११

अन्धकारमयी मूका जाड्यजर्जरितान्तरा ।

तनुत्वमेति संसारवासनेवोदये क्षपा ।। १२

दृष्टचिद्भास्करा प्रज्ञापद्मिनी पुण्यपल्लवा ।

विकसत्यमलोद्योता प्रातर्द्यौरिव रूपिणी ।। १३

प्रज्ञा हृदयहारिण्यो भुवनाह्लादनक्षमाः ।

सत्त्वलब्धाः प्रवर्धन्ते सकलेन्दोरिवांशवः ।। १४

बहुनात्र किमुक्तेन ज्ञातज्ञेयो महामतिः ।

नोदेति नैव यात्यस्तमभूताकाशकोशवत् ।। १५

विचारणा परिज्ञातस्वभावस्योदितात्मनः ।

अनुकम्प्या भवन्तीह ब्रह्मविष्ण्विन्द्रशंकराः ।। १६

प्रकटाकारमप्यन्तर्निरहंकारचेतसम् ।

नाप्नुवन्ति विकल्पास्तं मृगतृष्णामिवैणकाः ।। १७

तरङ्गवदिमे लोकाः प्रयान्त्यायान्ति चेतसः ।

क्रोडीकुर्वन्ति चाज्ञं ते न ज्ञं मरणजन्मनी ।। १८

आविर्भावतिरोभावौ संसारो नेतरक्रमः ।

इति ताभ्यां समालोको रमते स निबध्यते ।। १९

न जायते न म्रियते कुम्भे कुम्भनभो यथा ।

भूषिते दूषिते वापि देहे तद्वदिहात्मवान् ।। २०

विवेक उदिते शीते मिथ्या भ्रममरूदिता ।

क्षीयते वासना साग्रे मृगतृष्णा माराविव ।। २१

कोऽहं कथमिदं चेति यावन्न प्रविचारितम् ।

संसाराडम्बरं तावदन्धकारोपमं स्थितम् ।। २२

मिथ्याभ्रमभरोद्भूतं शरीरं पदमापदाम् ।

आत्मभावनया नेदं यः पश्यति स पश्यति ।। २३

देशकालवशोत्थानि न ममेति गतभ्रमम् ।

शरीरे सुखदुःखानि यः पश्यति स पश्यति ।। २४

अपारपर्यन्तनभो दिक्कालादिक्रियान्वितम् ।

अहमेवेति सर्वत्र यः पश्यति स पश्यति ।। २५

वालाग्रलक्षभागात्तु कोटिशः परिकल्पितात् ।

अहं सूक्ष्म इति व्यापी यः पश्यति स पश्यति ।।२६

आत्मानमितरच्चैव दृष्ट्या नित्याविभिन्नया ।

सर्वं चिज्ज्योतिरेवेति यः पश्यति स पश्यति ।। २७

सर्वशक्तिरनन्तात्मा सर्वभावान्तरस्थितः ।

अद्वितीयश्चिदित्यन्तर्यः पश्यति स पश्यति ।। २८

आधिव्याधिभयोद्विग्नो जरामरणजन्मवान् ।

देहोऽहमिति यः प्राज्ञो न पश्यति स पश्यति ।।२९

तिर्यगूर्ध्वमधस्ताच्च व्यापको महिमा मम ।

द्वितीयो न ममास्तीति यः पश्यति स पश्यति ।। ३०

मयि सर्वमिदं प्रोतं सूत्रे मणिगणा इव ।

चित्तं तु नाहमेवेति यः पश्यति स पश्यति ।। ३१

नाहं न चान्यदस्तीति ब्रह्मैवास्ति निरामयम् ।

इत्थं सदसतोर्मध्ये यः पश्यति स पश्यति ।। ३२

यन्नाम किंचित्त्रैलोक्यं स एवावयवो मम ।

तरङ्गोऽब्धाविवेत्यन्तर्यः पश्यति स पश्यति ।। ३३

शोच्या पाल्या मयैवेयं स्वसेयं मे कनीयसी ।

त्रिलोकी पेलवेत्युच्चैर्यः पश्यति स पश्यति ।। ३४

आत्मतापरते त्वत्तामत्ते यस्य महात्मनः ।

भवादुपरते नूनं स पश्यति सुलोचनः ।। ३५

चेत्यानुपातरहितं चिद्भैरवमयं वपुः ।

आपूरितजगज्जालं यः पश्यति स पश्यति ।। ३६

सुखं दुःखं भवो भावो विवेककलनाश्च याः ।

अहमेवेति वा नूनं पश्यन्नपि न हीयते ।। ३७

स्वात्मसत्तापरापूर्णे जगत्यंशेन वर्तिना ।

किं मे हेयं किमादेयमिति पश्यन्सुदृङ्नरः ।। ३८

अप्रतर्क्यमनाभासं सन्मात्रमिदमित्यलम् ।

हेयोपादेयकलना यस्य क्षीणा स वै पुमान् ।। ३९

य आकाशवदेकात्मा सर्वभावगतोऽपि सन् ।

न भावरञ्जनामेति स महात्मा महेश्वरः ।। ४०

तमःप्रकाशकलनामुक्तः कालात्मतां गतः ।

यः सौम्यः सुसमः स्वस्थस्तं नौमि पदमागतम् ।।४१

यस्योदयास्तमयसंकलनाकलासु

चित्रासु चारुविभवासु जगद्गतासु ।

वृत्तिः सदैव सकलैकमतेरनन्ता

तस्मै नमः परमबोधवते शिवाय ।। ४२

इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मीकीये मो० स्थितिप्रकरणे अनुत्तमपदविश्रान्तिवर्णनं नाम द्वाविंशः सर्गः ।। २२ ।।